भावे क्तः ।) जन्म । (पारिभाषिकपुत्त्रविशेषे, पुं । यथा, पञ्चतन्त्रे । १ । ४४१—४४२ ।
"जातः पुत्त्रोऽनुजातश्च अतिजातस्तथैव च ।
अपजातश्च लोकेऽस्मिन् मन्तव्याः शास्त्रवेदिभिः॥
मातृतुल्यगुणो जातस्त्वनुजातः पितुः समः ।
अतिजातोऽधिकस्तस्मादपजातोऽधमाधमः ॥")
उत्पन्ने त्रि । इति मेदिनी । ते, १६ ॥ (यथा, हितोपदेशे । १ । १४ ।
"कोऽर्थः पुत्त्रेण जातेन यो न विद्वान् न धार्म्मिकः।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥")

जातकं, क्ली, (जातं जन्म तदधिकृत्य कृतो ग्रन्थः इत्यण् ततः स्वार्थे कन् । यद्वा, जातेन शिशो-र्जन्मना कायतीति । कै+कः ।) जातबालकस्य शुभाशुभनिर्णायकग्रन्थः । तस्य भेदाः । जातकदीपिका १ जातकामृतम् २ जातकतरङ्गिणी ३ जातककौमुदी ४ जातकरत्नाकरः ५ जातकसारः ६ जातकार्णवः ७ जातकचन्द्रिका ८ लघुजातकम् ९ बृहज्जातकम् १० इत्यादि । इति ज्योतिषम् ॥

जातकः, पुं, कारण्डी । भिक्षुः । (जात+स्वार्थे कन् ।) जाते, त्रि । इति धरणिः ॥

जातकर्म्म, क्ली, (जातस्य जाते सति वा यत् कर्म्म ।) दशसंस्कारान्तर्गतसंस्कारविशेषः । तस्य क्रमो यथा । पुत्त्रे जाते पिता नाभिं मा कृन्तत स्तनञ्च मा दत्त इत्यभिधाय कृतस्नानः कृतवृद्धिश्राद्धः प्रक्षालितशिलायां ब्रह्मचारिणा कुमार्य्या गर्भवत्या वा श्रुतस्वाध्यायशीलब्राह्मणेन वा अनाहतलोष्टपिष्टौ व्रीहियवौ दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा मन्त्रेण कुमारस्य जिह्वां मार्ष्टि । ततस्तथैव सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततः पुनरपि सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततो नाभिं कृन्तत स्तनञ्च दत्तेति पिता ब्रूयात् । स्नानं पुनः पिता न कुर्य्यात् । इति भवदेवभट्टः ॥

जातवेदाः, [स्] पुं, (विद्यते लभ्यते इति । विद् लाभे+असुन् । जातं वेदो धनं यस्मात् ।) अग्निः । (अस्य निरुक्तिरुक्ता यथा, महाभारते २ । ३१ । ४१ ।
"पावनात् पावकश्चासि वहनाद्धव्यवाहनः ।
वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ॥")
चित्रकवृक्षः । इत्यमरः । १ । १ । ५६ ॥
(जाते जाते सर्व्वप्रपञ्चस्य स्वस्मिन् अध्यस्ततया विद्यते यो जीवः । यद्वा, जातानि सर्व्वाणि कारणत्वेन विदन्ति यमिति । विद् ज्ञाने+असुन् । अन्तर्यामी परमेश्वरः । यथा, भागवते । ५ । ७ । १४ । "ओँ परो रजः सवितु र्जातवेदो देवस्य भर्गो मनसेदं जजान ॥" "जातं वेदो धनं कर्म्मफलं यस्मात् कर्म्मफलदमित्यर्थः ॥" इति श्रीभागवतटीकाकृत् श्रीधरस्वामी ॥)

जातरूपं, क्ली, (जातं प्रशस्तं रूपं यस्य ।) स्वर्णम् । (यथा, भागवते । १ । १७ । ३८ ।
"पुनश्च याचमानाय जातरूपमदात् प्रभुः ॥")
धुस्तूरः । इत्यमरः । २ । ९ । ६५ । उत्पन्नरूपे, त्रि । यथा, नैषधे । १ । १२९ ।
"न जातरूपच्छदजातरूपता
द्विजस्य दृष्टेयमिति स्तुवन् मुहुः ॥"

जातापत्या, स्त्री, (जातमपत्यमस्याः ।) प्रसूता । इत्यमरः । २ । ६ । १६ ।

जातिः, स्त्री, (जायतेऽस्यामिति । जन्+अधिकरणे क्तिन् ।) गोत्रम् । (जन+भावे क्तिन् ।) जन्म ॥ अश्मन्तिका । आमलकी । सामान्यम् । तत्तु ब्राह्मणक्षत्त्रियवैश्यशूद्रात्मकम् । छन्दः । जातीफलम् । मालती । इति मेदिनी । ते, १६ ॥ (अस्याः पर्य्याया यथा,—
"जातिर्ज्जाती च सुमना मालती राजपुत्त्रिका।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
काम्पिल्लः । इति विश्वः ॥ गोत्वादिः । तस्य लक्षणं यथा, मुग्धबोधे ।
"आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥"
अस्यार्थः । "आक्रियते व्यज्यतेऽनयेति आकृतिः संस्थानं आकृत्या ग्रहणं ज्ञानं यस्याः सा आकृतिग्रहणा जातिराकृतिग्रहणा भवति संस्थानव्यङ्ग्या इत्यर्थः । तेन मनुष्यगोमृगहंसादीनां पृथक् पृथक् संस्थानैर्व्यज्यमाना मनुष्यत्वगोत्वमृगत्वहंसत्वादिर्जातिः । एवं ब्राह्मणक्षत्त्रियवैश्यशूद्राणां पृथक् संस्थानाभावाद्ब्राह्मणत्वादेर्जातित्वं नायातमिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्व्वभागिति या सर्व्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः । स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः । जातिभेदाः पुमाख्याश्च इत्यमरसिंहे जातिभेदानां स्त्रीपुंसयोरेवेति नियमे ब्राह्मणादीनां सर्व्वलिङ्गभाजित्वाभावाज्जातित्वम् । किन्तु अज्ञातहंसस्य जनस्य हंसं दृष्टवतोऽपि तस्य संस्थानेन हंसत्वं व्यञ्जितुं न शक्यते इति हंसस्यापि जातित्वं नायातमिति पूर्व्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यापि सर्व्वलिङ्गभाजित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदाख्यातनिर्ग्राह्येति सकृदेकवारमाख्यातेन उपदेशेन निर्निश्चयेन ग्राह्या ग्रहीतुं शक्या इत्यर्थः । तेन ईदृशो हंस इत्युपदेशे हंसं दृष्टवतस्तस्य संस्थानेन हंसत्वं व्यञ्जितुं शक्यत एवेति पूर्व्वलक्षणस्य न दोषः । एवं देवदत्तादिसंज्ञाशब्दस्य एकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्व्वलिङ्गभाजित्वात् संस्थानव्यङ्ग्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह गोत्रञ्चेति । पुत्त्रपौत्त्रप्रभृतिकमपत्यं गोत्रमिति पूर्व्वाचार्य्यपरिभाषितं गोत्रमिह गृह्यते गार्गीवात्सीत्यादि । चतुर्थलक्षणमाह चरणैः सहेति चरणञ्च जातिरित्यर्थः । चरणशब्दो वेदैकदेशवाची कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तं गार्ग्यादीनां षित्वादीपि सिद्धेऽपि जातिसंज्ञा फलन्तु गार्गी भार्य्या यस्यासौ गार्गीभार्य्यः इत्यादौ नोपाककोडित्यादिना पुंवद्भावनिषेधः । गार्गी चासौ भार्य्या चेति गार्ग्यभार्य्या इत्यादौ कोडादिः पुंवदित्यादिना पुनः पुंवद्भावः ।" इति दुर्गादासः ॥
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च॥
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥"
इति भाषापरिच्छेदे । ८-९ ॥
तल्लक्षणन्तु "नित्यत्वे सत्यनेकसमवेतत्वम् ।" इति सिद्धान्तमुक्तावली ॥

जातिकोशं, क्ली, (जातेः कोशमिवेति ।) जातीफलम् । इति भावप्रकाशः ॥

जातिकोषं, क्ली, (जातेः कोषमिव ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (जयित्री इति लोके प्रसिद्धम् । तदत्र जातीफलानामावरणदलं व्यवहृतम् । तद्यथा वैद्यकरसेन्द्रसारसंग्रहे कासाधिकारे शृङ्गाराभ्ररसे ।
"कर्पूरं जातिकोषं सजलमिभकणातेजपत्रं लवङ्गं
मांसी तालीशचोचे, गजकुसुमगदं धातकी
चेति तुल्यम् ।
पथ्या धात्री विभीतं त्रिकटुरपि पृथक्त्वर्द्ध-
शाणं द्विशाण-
मेलाजातीफलाख्यं क्षितितलविधिनाशुद्धगन्धस्य
कोलम् ॥"
जातिकोषजातीफलयोरेकस्मिन्नौषधे समुल्लेखादत्रैव जयित्रीति लोकप्रसिद्धम् । औषधन्तु सर्व्वत्रैव प्रयुज्यते ॥)

जातिकोषी, स्त्री, (जातिकोषमस्या अस्तीति । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीप् ।) जातीपत्री । इति राजनिर्घण्टः ॥

जातिफलं, क्ली, (जात्याख्यं फलमिति ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥

जातिभ्रंशकरं, क्ली, (जातेर्भ्रंशं करोतीति । कृ+टः ।) नवविधपापान्तर्गतपापविशेषः । यथा, मनुः । ११ । ६७ ।
"ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः ।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् ॥"
"ब्राह्मणस्य दण्डहस्तादिना पीडाक्रिया अघ्रेयं लशुनपुरीषादि जैह्म्यं कुटिलत्वं वक्रता ।" इति कुल्लूकभट्टः ॥

जातिवैरं, क्ली, (जात्या स्वभावतो वैरं शत्रुत्वम् ।) स्वाभाविकशत्रुत्वम् । तत्पञ्चविधम् । स्त्रीकृतम्ः